मात्रसंहर्ता । नचाधिकभोक्तृत्वेऽप्यधिकसंहर्तृत्वेऽपि विशिष्य तन्मात्रग्रहणे प्रयोजनमस्ति । यद्येतदुपासनाप्रकरणं स्यात् तदा अन्तरादित्यविद्यायां विशिष्य लोककामविशेषेशितृत्वश्रवणवत् विशिष्य ब्रह्मक्षत्रसंहर्तृत्ववर्णनमुपासनार्थमिति कल्प्येतापि । नत्वेतदुपासनाप्रकरणम् । तथा च यथा 'यस्मिन् पंच पञ्चजना' (बृ - ४ - ४) इत्यत्र विशिष्य पञ्चानां मनुष्याणामाधारइति कीर्तने प्रयोजनं न किञ्चिदस्तीति तल्लक्षणीयाकाङ्क्षायां वाक्यशेषात् प्राणादयस्तल्लक्षणीयाइति निश्चीयन्ते । एवं ब्रह्मक्षत्रग्रहणमितरेषामपि केषाञ्चिदुपलक्षणं न स्वार्थमात्रनिष्ठमिति उपलक्षणीयाकाङ्क्षायां पश्चात्तनमृत्यूपसेचनकीर्तनात्तदुपसिच्यमानं सर्वमुपलक्षणीयमिति निश्चीयते । किञ्चौदनशब्दस्योक्तयुक्त्या संहार्यत्वलक्षकतास्थितौ यच्छब्दयोगेनानुवादकेऽस्मिन्मन्त्रे संहार्यसमर्पकस्य 'ब्रह्म च क्षत्रं च, इत्यस्य 'सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः' (छा - ६ - ८) इत्यादिपुरोवादानुसारेण चराचरात्मकविनाशिमात्रोपलक्षकत्वमावश्यकम् । नचैतदुपपादनं व्यर्थम् । जन्मादिसूत्रोक्तलक्षणान्तर्गतसकलजगत्संहर्तृत्वाधिकरणजगत्कारणमायाशबलोपलक्षिते शुद्धब्रह्मणि कठवल्ल्यास्समन्वयस्य स्पष्टीकरणार्थत्वात् । उक्तरूपे ब्रह्मणि वेदान्तानां समन्वयस्य समन्वयसूत्रे सामान्यतः प्रदर्शितस्य विशिष्य तत्तद्वाक्योदाहरणमुखेन प्रसाधनमेवब्रह्मध्यायशेषस्य मुख्यं प्रयोजनमित्यानन्दमयाधिकरणोपक्रमे वर्णितं । तत्र यदि सकलब्रह्मक्षत्रसंहर्तृत्वमात्रमिह गृह्यते तदा तस्य ब्रह्मणोऽन्यत्रासम्भवेन ब्रह्मलिङ्गत्वेऽपि ब्रह्मणएव व्यष्टिसंहारकतमोगुणोपाधिको रूपविशेष इहअत्ता । 'कइत्था वेद यत्र स' इति तु तस्य प्रतिष्ठारूपस्सकलप्रपञ्चसृष्टिस्थितिसंहारकारी मायाशबलितः परमेश्वर उच्यतइति शङ्कया तस्य शुद्धब्रह्मणि समन्वयः प्रदिदर्शयिषितस्स्पष्टीकृतो न स्यात् । अतएव सूत्रकृताऽपि 'सर्वग्रहणादि' ति लघुनि सूत्रे कर्तव्ये वाच्यार्थयोर्ब्रह्मक्षत्रयोस्सामस्त्यमात्रं सर्वशब्देनोच्यतइति शङ्कया जगत्कारणोपलक्षितशुद्धब्रह्मसमन्वयः प्रदिदर्शयिषितः स्पष्टीकृतो न स्यादिति ब्रह्मक्षत्रपदयोर्न्यायप्राप्तचराचरोपलक्षकत्वसूचनेन तस्य स्पष्टीकरणाय 'चराचरग्रहणादि' ति सूत्रं कृतं । अतएवेदमधिकरणमप्यर्थवत् । जगत्कारणस्य सगुणब्रह्मणोऽपि प्रतिष्ठारूपे शुद्धब्रह्मणि समन्वयप्रदर्शनार्थत्वात् । अन्यथाह्यत्रात्तुर्जीवत्वेऽपि 'यत्र स' इति तत्प्रतिष्ठात्वेन वर्ण्यमानं प्रकृतं ब्रह्म भवेदेवेति तस्य परमेश्वरत्वप्रसाधनं व्यर्थमेव स्यात् । तस्मात् समृत्युकस्य कृत्स्नस्य चराचरस्य संहार्यत्वप्रतिपादनात्तत्संहर्तृरूपो 'यत्र स' इति शुद्धे प्रतिष्ठितत्वेन वर्ण्यमानोऽत्ता परमेश्वर इति निरवद्यम् ॥ १ ॥ २ ॥ ९ ॥

स्यादेतत् 'न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् अजो नित्यश्शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे । हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतं । उभौ तौ न विजानीतो नायं हन्ति न हन्यते' इत्यादि प्रकरणं तावदिह जीव-